Funding: IKS/Tattva Heritage. Digitization: eGangotri.

श्रीः

कावेरीमहिमादर्शः

अथवा

श्रीकृष्णराजसागरसेतुबन्धः

किञ्च

व्याघ्रतटाकभूविवरवर्णनम्

ग्रन्थकर्ता

जग्गु-वेङ्कटाचार्यः

आस्थान विद्वान्

वि. वि. डि. पवर् प्रेस्,

अरळेपेटे, — — वेङ्कटपुरु सिटि

क्रि. श. १९३३

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

श्रीः

कावेरीमहिमादर्शः

अथवा

श्रीकृष्णराजसागरसेतुबन्धः

किञ्च

व्याघ्रतटाकभूविवरवर्णनम्

ग्रन्थकर्ता

जग्गु-वेङ्कटाचार्यः

आस्थान विद्वान्

बि. बि. डि. पवर् प्रेस्

अरळेपेटे, – – वेङ्गळूरु सिटि

क्रि. श. १९३३

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

All Rights Reserved.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

॥ श्रीः ॥

ग्रन्थकर्तुर्विज्ञापनम् ।

विदितमेवैतत्खलु भवतां; "यदस्मत्प्रभुणा श्रीमन्नाल्वडीकृष्णभूपेनेदंप्रथमतया निर्मापितः 'कृष्णराजसागरसेतु'नाम्ना प्रख्यातः कावेरीनद्यास्सेतुः भूलोकरत्नमिति द्वीपान्तरवासिभिरप्यसकृदागत्य विस्मितचित्तैर्विलोक्यते" इति । निकटवासिनापि तदिदं भुवनरत्नमपश्यता चिरानुतप्तहृदयेन मया 1928 तमे क्रिस्ताब्दे कमिंश्चिद्दिवसे गत्वा कुतूहलिनासोऽयं व्यलोकि, होरात्रयकालं यावत् ॥

तदात्वे च भगवतो जगत्स्रष्टुः, देव्याश्च कावेर्याः, सद्गुणगणमणिभूषणस्य कृष्णभूपस्य च महिमानं तथा तथा भावयन्तं चित्रीयमाणचित्तं मामियं न्ययूयुजत्स्वभावसुलभा कवितावासना प्रबन्धबन्धे ॥

प्रबन्धश्चायमल्पोऽपि, यद्गुणमुद्घोषयति तमेवास्मत्परिपोषकं प्रभुमर्हतीति, तस्मा एव महीशूरदेशाधीशश्रीमन्नाल्वडी-कृष्णभूभुजे सम्मुद्र्य समर्पितोविजयताम् । एतच्छेषभूतः व्याघ्रतडाक(हुलिकेरे–इरविन्केनाल्) भूविवरवर्णनरूपः प्रबन्धोऽपि विजयतात् ॥

स्थानम्
(मेल्कोटे) यादवाद्रिः
क्रि. १.–१२–३३

जग्गु-वेङ्कटाचार्यः,
साङ्ख्यवेदान्तविद्वान्, साङ्ख्यतीर्थः,
आस्थानविद्वान्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

अस्य ग्रन्थस्य सर्वेऽधिकाराः राजकीयनियमानुसारेण
ग्रन्थकर्त्रा स्वायत्तीकृताः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

॥ श्रीः ॥

॥ श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः ॥

श्रीकावेरीमहिमादर्शः

अथवा

श्रीकृष्णराजसागरसेतुबन्धः

— मङ्गळाचरणम् —

यत्सङ्कल्पवशान्नद्यस्स्रवन्ति सततं भुवि ।
तं जगद्रक्षकं नौमि कमलाकामुकं हरिम् ॥ १ ॥

कावेरीप्रार्थनारूपं मङ्गळम् ।

कावेरि त्वां स्तोतुमुद्योगिनो मे वाचं शुद्धां मां च सिद्धं कुरुष्व ।
दृष्टादृष्टे शुद्धिसिद्धी विधातुं भूमावस्यां तेऽवतारग्रहो यत ॥ २ ॥

— कावेर्युत्पत्तिः —

राज्ञः कवेरस्य बभूविथ त्वं मोक्षार्थिनो धातृवराद्विमुक्त्यै ।
पुत्री नदीरूपधरा च माये! रूपान्तरात्कुम्भभुवश्च पत्नी ॥ ३ ॥

— हिमाचले तस्यास्तपः, अगस्त्यविवाहः, सह्याद्रिप्राप्तिश्च —

उदीचीने तीव्रं तुहिनगिरिशृङ्गे विदधतीं
तपस्त्वां सम्प्राप्तो विधिवचनतः कुम्भतनुभूः ।
गृहीत्वा पाणिं ते स्वकलशगतैस्तीर्थसलिलै-
स्समस्तैस्सह्याद्रिं सममनयदप्त्वं गतवतीम् ॥ ४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

तत्र शिष्यजनतावशगां तां कुण्डिकामुपनिधाय कदाचित् ।
तन्मुनौ समुचिताय गते त्वं निर्गमाय खलु यत्नमकार्षीः ॥ ५ ॥

— तुलासंक्रमणे कावेर्याः कुण्डिकातो निर्गमनम् —

तदा तुलासंक्रमणेऽतुले रवेरुपस्थिते वायुबलाद्विवर्तितात् ।
विनिर्जगन्थाशु घटाद्घटात्मजाद्विशङ्कमानेव पुनस्स्ववन्धनम् ॥ ६ ॥

— दिव्यामलकतीर्थसंसर्गः, अदर्शनं च कावेर्याः —

विरजाम्भसा विधात्रा शङ्खगतेनाभिषिक्तपादस्य ।
दिव्यामलकस्य हरेः पादाम्भस्सङ्गता च मृग्याऽभूः ॥ ७ ॥

— कावेर्या अदर्शनादगस्त्यस्य शोकः —

अनवलोक्य मुनिर्भवतीं ततः परिजनाय चुकोप च विह्वलः ।
दशमुखापहृतप्रियराघवोदितदशां च बभार मुहुर्मुहुः ॥ ८ ॥

— किञ्चिद्दूरे तस्याः पुनर्दर्शनम् —

तादृशं मुनिमुदीक्ष्य विह्वला क्रोशयुग्ममितकाननान्तरे ।
दर्शनं ददिथ वेणिकाम्भसो निर्धनस्य निधिवद्दयावती ॥ ९ ॥

— अगस्त्येन सम्भाषणम्, तदनुमत्या पुनर्गमनं च कावेर्याः —

दृष्टा च तेन मुनिना गमनं च पृष्टा
स्रष्टुर्वरं प्रथममिष्टतमं च तस्य ।
आचष्ट तत्रभवती तदनु प्रहृष्टस्तुष्टाव
शिष्टजनतेष्टकरीं मुनिस्त्वाम् ॥ १० ॥

— विष्णुना कावेर्यै वरप्रदानम् —

हरिस्ते शिरस्यम्ब दत्तात्रिपुत्रो वसन्मध्यदेशेऽपि रङ्गेशरूपः ।
वरं ते ददौ पादमात्रोद्भवायाः परत्वं त्ववाचीनगङ्गाभिधां च ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— देवादिभिस्तुतायास्समुद्राभिमुखगमनम् —

अथ दिवि भुवि सुरनरनिकरकृत-
स्तुतिरवमुखरितगगनदशदिशा ।
त्वरितगतिरखिलजगदघहरणे
कृतमतिरभिमुखमुदधिमनुगता ॥ १२ ॥

— कावेर्या उपनद्यः —

सुज्योतिकां च कनकां च जगत्पवित्रां
हेमावतीं च कपिलां च कदम्बिनीं च ।
अन्याश्च सङ्गतवतीरतिहृष्टपुष्टा
वेगात्पतिं समनयो बत सङ्गमाय ॥ १३ ॥

— कावेर्या नानाविधगमनम् —

ह्रीणेवाल्पतनुः क्वचिद्भयवती वान्यत्र शीघ्रातिगा
पुष्टाङ्गी सुहितेव मन्थरगतिः कुत्रापि हृष्टेव च ।
मत्तेव क्वचन स्खलन्त्यपि यथा भ्राम्यन्त्यथोन्मादिनी
नानाभाववती विभास्यभिसरन्तीव स्रवन्ती पतिम् ॥

— समुद्रगमनम् —

अतिपरिमितपाथःपात्रजन्मेत्यकीर्तिं
जहदिव तव भर्ता चूषयामास वार्धिम् ।
उभयविधमघं द्वौ मान्वभूतामिति त्वं
तदनुमतिमवाप्ता पूरयामासिथाब्धिम् ॥ १५ ॥

— दक्षिणदिगाश्रयणम् —

तपोनिष्ठस्य भर्तुर्मे दक्षिणाशासमागमः ।
न युक्त इति रोद्धुं त्वं तामेवानुससर्थ किम् ॥ १६ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— कावेर्या जन्मभूमिमारभ्य समुद्रसङ्गमपर्यन्तमुभयोः पार्श्वयोर्देवालयाः —

आजन्मभूमिधरमा च समुद्रसङ्गं
त्वत्तीरयोर्हरिहरालयपङ्क्तिरिन्धे ।
त्वत्स्नानतोऽथ जननाद्धरिदर्शनस्य
ज्ञानाद्युपायपदवीं भवतीं नयन्ती ॥ १७ ॥

— कावेर्या विष्णुमायारूपत्वम् —

आदौ मध्ये सङ्गमे चात्मनस्त्वं ह्रासं वृद्धिं नैकतां दर्शयन्ती ।
पाप्मश्रेयोवर्ष्मणां च क्रमेण स्नातुर्मायाभावमाचख्यिथ स्वम् ॥

त्वत्तीरस्थस्तु कश्चित्तव जलमवलोकेत चेद्दत्तदृष्टि-
र्मन्येतायं किमेतत्कुत इदमथवा कस्य कस्मै कदा वा ।
कोवा कालोऽवधिस्स्यान्ननु सततमिदं स्यन्दते सर्वमेत-
त्स्रोतोवत्स्यादनादीत्यत इह भवती विष्णुमायैव साक्षात् ॥

— शन्तनुभीष्मादीनां कावेरीस्नानादिष्टप्राप्तिः —

पार्थो भीष्मश्शन्तनुर्धर्मपुत्रो राजानोऽन्ये सूर्यचन्द्रान्ववायाः ।
कावेरि त्वत्स्नानतः प्रापुरिष्टं हित्वाऽनिष्टं तत्तदेवाशु भक्त्या ॥ २० ॥

— देवादीनामपि मुक्तये कावेरीवासः —

अमरास्त्वदीयजलमाश्रितामुहुर्जलजन्तुतामुपगता विमुक्तये ।
सिकताशिलात्वमपि संश्रितास्तथा निवसन्तितीरभुवि वृक्षपक्षिणः ॥

— कावेरीतीरयोः कलमक्षेत्रम् —

तव तीरगतस्तटयोरुभयोस्समभूमिमसौकलमोपचिताम् ।
नयनातिगतां नयने कुरुते यदि तस्य कथं क्षुदिहोपनमेत् ॥ २२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— पुण्ड्रेक्षवः —

त्वत्तीरवासिनिभृतं धवळोर्ध्वपुण्ड्रं
पीत्वा तवेदममृतं सरसेक्षुवृन्दम् ।
पीतामृतं हरिगुणैरथ दम्भशून्यं
श्रीवैष्णवं सरसमाह विमर्द्यमानम् ॥ २३ ॥

— नाळिकेरवनम् —

हालिकोऽपि तव तीरसम्भवं
नाळिकेरफलनीरमापिबन् ।
क्षीरवार्धिनवनीतमालिह-
देववृन्दमपहास्यतां नयेत् ॥ २४ ॥

— बलाकाः —

तवोर्ध्वं बद्धपङ्क्त्योमूर्डयन्ते बिसकण्ठिकाः ।
पताकिकाभिश्शुक्लाभिस्तोरणस्रगिवाचिता ॥ २५ ॥

— कावेरीवर्णनम् —

श्रीमत्कर्णाटपृथ्वीयुवतिगळमहामौक्तिकैकावळी त्वम्
निश्रेणी दक्षिणाशाजनपदनिवहे स्फाटिकी भुक्तिमुक्त्योः ।
दैत्यारेर्गर्भशालाततिरिह शयितुर्विस्मृतक्षीरवार्धेः
किञ्च श्रीकृष्णभूभृत्कुलकुशलमहामूलिका सिद्धबद्धा ॥ २६ ॥

— एवंभूतायाः कृष्णराजसागरे निरोधः —

इत्थं लोकद्वितयभरणे बद्धदीक्षा वहन्ती
केनाप्येवं विहतगमना क्वापि नासीः कदापि ।
अद्य श्रीमद्यदुकुलजनुः कृष्णभूपस्तु दुर्गे
जग्राह त्वां सकलफलदां राजधानीसमीपे ॥ २७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— कावेर्यास्सेतुना बन्धः —

बन्धोऽपि महतीनां तु महते श्रेयसे भवेत् ।
लङ्काबन्धो हि वैदेह्याः देवस्त्रीबन्धमुक्तये ॥ २८ ॥

— कावेर्या गङ्गात्वं, कृष्णभूपस्य शम्भुत्वम् —

ब्रह्माद्रेस्स्वर्गलोकादिव बहुरभसादागता मार्गमध्ये
रुद्धा कृष्णेन राज्ञा जलधरणवराच्छम्भुनेवात्ममूर्ध्नः ।
मुक्ता तेनैव भूयो बहुमुखमवहः पातुकामा ह्यधस्स्थान्
गङ्गेव त्वं च कावेर्यसदृशकरुणे वत्सले भक्तवर्गे ॥ २९ ॥

— कृष्णराजसागरसेतुः —

त्रिपुरदहनयुद्धे ज्याविधौ यो वृतः प्राक्
जलधिमथनकाले योक्त्रकृत्ये सुरैर्यः ।
स इह नृपवरेण प्रार्थितस्तिर्यगास्ते
तव जलधरणार्थे नैष सेतुः कथञ्चित् ॥ ३० ॥

— कावेर्या भगवतो वा सङ्कल्पः सेतुः —

क ते भित्तिर्व्यामत्रितयविमिता नीरधरिणी
क वा धार्यं तेऽम्भोविमितमतिगव्यूतिशतकैः ।
तवेच्छा सेयं तत् बहुमुखतया जीवनकरी,
तथा बुद्धिर्विश्वेश्वरविहितबन्धा न तु तथा ॥ ३१ ॥

— सेतौ स्रोतोद्वाराणि —

कुल्याभ्यष्षट्, तटिच्छत्त्युपजननकृतेऽन्यानि चत्वार्यथाष्टौ
स्वाभाविक्यै सरण्यै, तव हृदयविशुद्ध्यै, च कृत्वा पुनश्च ।
द्वाराण्युद्वेलनीरापसरणविधये षोडशान्यान्यनेका-
न्यप्येवं दत्तमार्गा बहुमुखमथ चेद्रुध्यसे को निरोधः ॥ ३२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— सेतोरुपरि पार्श्वयोर्भित्तिः —

सजालरन्ध्रभित्तिभ्यां सेतोरुपरि पार्श्वयोः ।
भ्रान्त्या पतिष्यमाणस्तु पाणिभ्यामिव वार्यते ॥ ३३ ॥

— भित्त्यभावकाले —

भक्तिज्ञानक्रियाद्युक्तसाधनान्तरवर्जिताः ।
कति वा भ्रान्तपतिता दिवं नीतास्त्वया पुरा ॥ ३४ ॥

— तत्रैव जलमानयन्त्रगृहद्वयम् —

अगाधमपि तेऽम्भोऽयं सेतुर्मग्नो जले तव ।
उद्धृत्य बाहू मात्यद्य मानयन्त्रगृहच्छलात् ॥ ३५ ॥

— सेतोरुपरि शासनम् —

यदुपज्ञं प्रवृत्तोऽस्मि तस्मिन्नेषा कृतज्ञता ।
इत्येवं शिरसा सेतुर्धत्ते शासनपट्टिकाम् ॥ ३६ ॥

— तत्रैव तटिद्दीपपङ्क्तिः —

प्रतिनिशमवभाति दीपपङ्क्तिर्यदुपरि सुस्थिरवृत्तचञ्चलेव ।
नरपतिदृढभक्तिधारिता किं मणिरशना तव सह्यजे वलग्ने ॥ ३७ ॥

— तत्रैव जलनळिकाः —

मध्याह्ने यदुपरि सर्पतां सुदूरं
श्रान्तानां तृडुपशमाय नाळिकाभ्यः ।
त्वन्नीरं वितरसि तत्र तत्र मध्ये
दौर्लभ्यादुभयत एव वारिणस्ते ॥

— सेतोः प्राग्भागे भित्तौ कावेरीप्रतिमा —

आद्यं रूपं मानुषं तेऽभवत्प्राक् द्वैतीयीकं वाहिनीरूपमम्ब ।
तार्तीयीकं त्वद्य सेतोः पुरस्ताद्भित्तावर्चारूपमास्ते नृपार्थे ॥ ३९ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— सेतोः प्रागधस्तिष्ठतस्सेतुदर्शनम् —

त्वत्सेतुपूर्वभागे मध्याधस्स्रोतसस्तटे तिष्ठन् ।
आताळद्वयदघ्नं छिन्नं सेतुं भवेत्कथं दृष्ट्वा ॥ ४० ॥

— सेतोर्वलभ्यां क्षौद्रपटलानि —

अत्युन्नतत्वादनपायभावात् प्रत्यङ्कणं सेतुबहिर्वलाभ्याम् ।
क्षुद्राचितेयं मधुकोशपङ्क्तिर्यथावळी म्लेच्छयुवाऽऽस्यलोम्नाम् ॥

— श्रीकृष्णराजसागरः —

दयितजलधिचिन्तासन्ततेस्स्तम्भितात्मा
भ्रमरघुणनयात्त्वं सागरीभावमापः ।
नयदि कथमिवस्याद्दृष्टिवर्त्मातिगं ते
सलिलममितमम्ब प्रत्यगस्मात्तु सेतोः ॥ ४२ ॥

— कावेर्यास्सागरत्वम् —

लक्ष्मीस्सागरसम्भवा मयि तु तद्दारेषु तस्या जनिः
युक्ता, नो पुरुषे तथा यदि भवेदीर्ष्या नदीनां मयि ।
किं कुर्यामिति चिन्तया प्रतनया श्रीकृष्णभूपाश्रिता
तल्लक्ष्मीप्रसवाय सागरदशां तेनाद्य नीता ननु ॥ ४३ ॥

— ग्रामाणां जले निमज्जनम् —

निर्विण्णास्तपसिस्थितास्तव तटे ग्रामाः प्रभूता इमे
त्वत्स्नानात्स्वनिवासिनां प्रतिदिनं स्वेषामतल्लाभतः ।
श्रीकृष्णाभ्युदयं दयाविवशया दत्तं त्वया तं वरं
प्राप्याद्यातिगभीरपाथसि तले मग्नास्तनूस्तत्यजुः ॥

— मग्नानां ग्रामाणामुपरि पुनर्निर्माणम् —

मन्नीरे विहितनिमज्जना जना ये, ते ह्यूर्ध्वां गतिमतिरम्यदेहतां च ।
यान्तीति स्फुटतरमात्थ मद्विधेभ्यो ग्रामाणामुपरिनिवेशनात्पुनश्च ॥ ४५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— जलमग्ना जीर्णवृक्षाः —

आप्लावितास्त्वयैते तरवश्शीर्णा विशालाश्च ।
उदवासितापसा इव दृश्यन्ते मुक्तये सिद्धाः ॥ ४६ ॥

— जलार्धमग्नवृक्षस्थितनीरकाकाः —

स्वन्नीरमध्यस्थितपादपानां
शाखासु निष्पत्रलवासु भान्ति ।
सान्द्राचला नीरवनीरकाकाः
त्वत्स्नातृलोकाघचया इवैते ॥ ४७ ॥

— तटस्थिताः बकाः —

तरङ्गेषु स्नाता भसितसितदेहास्तव तटे
स्थिताः पङ्क्तीभूतास्स्तिमितनयनाङ्गा झषपराः ।
धनग्राहासक्तान् जपकपटनिष्कम्पतनुह-
द्विजानेते कह्लास्स्मृतिपथगतान्कुर्वत इह ॥ ४८ ॥

— शैलाच्छिलाऽऽहरणाय निर्मितः मध्येजलमल्पः कश्चन सेतुः —

क्रोशत्रयावस्थितशैलमूलाच्छिलास्समानेतुमिह प्रकृप्तः ।
मध्येजलं राजति सेतुरन्यः कपिप्रवीरैरिव सिन्धुमध्ये ॥ ४९ ॥

— सेतुस्थितस्य यदुगिरिदर्शनम्,
यद्वद्रिस्थस्य कृष्णराजसागरदर्शनं च —
(युग्मम्)

यद्वद्रेर्महिमानुवर्णनविधावित्थं पुराणे श्रुतं
'दृष्ट्वारान्नृहरेर्गिरिं नमत भो भक्त्या, भवद्दुष्कृतम् ।
दूरं गच्छति दर्शनादि'ति मया निम्ने प्रयान्त्या मुहुः
स्नातॄणां दुरितैः कथं नु स गिरिर्दृश्येत पापापहः ॥ ५० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

इत्थं सञ्चित्य कृष्णक्षितिपतिजनिमप्यन्तराशंसमाना
तेनाद्याभ्युद्धृता तं नृहरिगिरिमथालोक्यशुद्धान्तरात्मा ।
दृष्टा तत्रत्यभक्तैस्स्तुतिरवमुखरा, नम्रमूर्तिश्शिरोभि-
स्स्रोतोभिर्यासि तृप्ता क इव तव मनस्तृप्तिमेवं विदध्यात् ॥

— कृष्णराजसागरकृष्णराजयोः परस्पराभिवर्धनम् —

भवती कृष्णभूपेन वर्धिता स प्रभुस्त्वया ।
महतामुपकारो हि फलाय महते भवेत् ॥ ५२ ॥

— तटजले मत्स्याः —

स्वच्छातिगम्भीरविशालपाथोवासात्पृथुस्वच्छतया सरूपाः ।
विस्रम्भतीरे सममाप्य मत्स्याः चिराय कम्पानुमिता भवन्ति ॥

— अथ परीवाहः —

परीवाहस्थाने त्वरिततरमागत्य सलिलं
दृषद्दुर्गे निम्ने पतदभिकिरच्छीकरगणान् ।
इदंप्राग्द्रष्टॄणां जनयति हि दूरात्खलु धियं
शिखावद्धूमानां निकर इति सह्याद्रितनये ॥ ५४ ॥

निम्ननिम्नतरनिम्नतमासु प्रस्खलत्पृथुशिलासु जलं ते ।
जर्झरं प्रतिपदं विदधाति स्वच्छफेनगिरिसंशयमत्र ॥ ५५ ॥

सततमतिविलोलं चैकरूपात्तु लौल्या-
दचलमिव महीयस्यश्मकूटे निपाति ।
प्रतिपदहतशीर्णं शुद्धरूपं तवाम्भ-
स्तुहिनगिरिशिरोवद्दृश्यते सह्यजाते ॥ ५६ ॥

अचलं चलं च जलमत्र लक्ष्यते सरघाभिषक्त मधुसम्पुटं यथा ।
अत एव विस्मयवशैर्विलोक्यते विधिसृष्टयनास्पदविचित्रवस्तुवत् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

अत्र त्वद्दर्शनायैव पार्श्वे दूरस्थितानपि ।
पुनाना त्वं क्षणादेव शीकरैरभिषिञ्चसि ॥ ५८ ॥

— प्रसङ्गात् शिवसमुद्रे वैद्युतयन्त्रम् —

श्रीकृष्णभूपसचिवश्शेषाद्रिर्नाम धीमदग्रसरः ।
शिवसागरे व्यरचयद्वैद्युतशक्तिग्रहं यन्त्रम् ॥ ५९ ॥

— तेन यन्त्रेण स्वर्णखनेरुपयोगः —

यस्मान्निस्सृत्य नाड्यः कनकखनिमहाभोगिलोके वसद्भ्यः
स्वाग्रस्थैर्दीपजालैस्सततदिवसतां नित्यरुद्धे तमोभिः ।
कुर्वत्यो नागकन्या इव फणमणिभिर्भान्ति बद्धुं बलिं तं
विष्णोर्मायाप्रवृत्ताः पुनरिव जनिता रज्जवः पाशयुक्ताः ॥ ६० ॥

— यन्त्रप्रयुक्तदीपैः राजधान्या वीथीप्रकाशः —

यत्प्रस्थापितलोहनाळविसरत्तन्त्रीमुखप्रोद्वह-
द्विद्युच्छक्तिविदीपितप्रगुणितप्रोत्तुङ्गदीपाङ्कुराः ।
श्रीकृष्णक्षितिपालराजनगरीवीथीर्निशास्वन्वहं
लक्ष्मीताण्डवरङ्गमण्डपततीः कुर्वन्त्यतीवोज्ज्वलाः ॥

— विद्युच्छक्त्या सर्वकार्यनिर्वाहः —

चुल्लीकाष्ठकरीषनीरदहना वर्त्यश्च तैलं तथा
शूर्पोलूखलचालिनीमुसलका वातघ्नतैलानि च ।
वेमाद्या व्यजनं घरट्टकरपत्राद्या मुधा प्राक्तना
यच्छक्तिप्रचलैस्तु यन्त्रनिवहैः प्रायो नगर्यादिषु ॥ ६२ ।

— रात्रावाकाशचारिणां दीपेषु नक्षत्रभ्रमः —

विमानचारिणो रात्रौ चामुण्डाद्रिपराहताः ।
भुवं जानन्ति यद्दीपैः प्राग्भ्रान्ता भगणा इति ॥ ६३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— अन्ततो ब्रह्मप्राप्तिरपि विद्युच्छक्त्यधीना —

विशिष्य किमिहोक्तेन यदसाध्यं न किञ्चन ।
अन्ततो ब्रह्मगमनं मुक्तानामपि यत्क्रिया ॥ ६४ ॥

— एतस्य यन्त्रस्य कावेर्यैव कार्यकारित्वम् —

यन्त्रस्य तस्य प्रथमं तु चक्रं स्रोतःकरेणातिविसारितेन ।
आवर्तयस्यम्ब मुहुस्सुशीघ्रं नोचेत्कथं तादृशदिव्यशक्तिः ॥ ६५ ॥

— ग्रन्थोपसंहारः —

कावेरीमहिमादर्शे कृष्णभूपोऽपि दृश्यते ।
आदर्शे वदने दृष्टे तिलकः केन वार्यते ॥ ६६ ॥

— श्रीकृष्णभूपमङ्गळम् —

यद्बद्धसेतुपरिदर्शनविस्मितेन
यस्यानुमायमतिपौरुषसाहसादीन् ।
इत्थं स्तुतासि विधिशैलसुते मया त्वं
तं पालयाम्ब सुचिरं भुवि कृष्णभूपम् ॥ ६७ ॥

श्रीकृष्णराजाम्बुधिसेतुबन्धः श्रीकृष्णभूमीश्वरसंश्रितेन ।
आस्थानविद्वद्घटकेन जग्गू-श्रीवेङ्कटार्येण कृतस्समिन्धे ॥ ६८ ॥

8 2 9 1
वसुनेत्रनिधीन्दूनां सङ्ख्यया परिकर्मिते ।
2 2
कैस्ताब्दे मासि नेत्राङ्के तदङ्के दिवसे त्वियम् । ॥ ६९ ॥

सकृद्दर्शनबुद्धिस्थविषयप्रतिपादिका ।
कृतिस्सम्पूर्णतां नीता यद्बद्रीश्वरवीक्षणात् । ॥ ७० ॥

श्रीकृष्णराजसागरसेतुबन्धः सम्पूर्णः

॥ श्रीः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

॥ श्रीः ॥

श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः

व्याघ्रतडाकभूविवरवर्णनम्

(इरविन् केनाल्)

— कावेर्याः कुल्या —

कलौ पृथ्व्यां पातुं जलमपि न विन्दंस्तत इतो
नदीतीरं वस्तुं व्रजति जन इत्यार्षवचनम् ।
मृषाकर्तुं कुल्यातनुरनुगता यज्जनपदान्
तदेतत्तेऽम्ब स्यात् किमथ करुणा कृष्णनृपतेः ॥ १ ॥

— कुल्योद्देश्यं, गिरिभेदनं च —

निम्नोन्नतस्थलजलादिभिदानपेक्षं
देशं स्वमातृकमिदं निखिलं विधातुम् ।
यान्त्यास्तवाम्ब गिरिरप्यवकाशदायी
कृष्णे विभौ न हि सहायकरेऽस्त्यभाव्यम् ॥ २ ॥

— कुल्याया नदीत्वम् —

परोपकारे स्वयमक्षमा नदीः स्वयं गृहीत्वा परिपुष्टशक्तिकाः ।
विधाय चैकत्वमथाम्ब ताः पुनः हिनोषि किं कृत्रिमनिम्नगामिषात् ॥

— परोपकारिण्याः कावेर्याः कृष्णभूपाश्रयात्कार्यकरत्वम् —

परोपकारैकफलाय ते तनूः द्वितीयभूतात्मतया धृता त्वया ।
श्रीकृष्णभूपाश्रयतस्त्वितः परं किं किं मनस्यम्ब करोषि चिन्तितम् ॥ ४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— कुल्यावर्णनम् —

यास्स्रवन्ति पृथिवीं परितस्ताः
निम्नगा इति वहन्त्य यशो नः ।
उद्धरामि तदहन्त्विति सा त्वं
दूरगापि समगैव किमासीः ॥ ५ ॥

— कुल्यायाः क्षुद्रनदीनामुपरि सेतुभिर्गमनं, क्षुद्रनदीनां कुल्याधोगमनं च —

देशं देवप्रसूकं तदधिकतटिनीमातृकं संविधातुं
नो शक्ता गच्छताधो मम विशत ततस्सह्यजां तूर्णमेव ।
साहं पूर्वोक्तकार्ये द्रुहिणगिरिभुवा चोदिता तत्र शक्ता
गच्छाम्यूर्ध्वं तु वोऽद्येत्युपरि हि सरितां सेतुभिर्याति सेयम् ॥

— कुल्यायास्त्रिपथगात्वम् —

भमौ समायां, दिवि सेतुमार्गे
षूत्तानभूमौ विवरे धरित्र्याः ।
त्रिधा वहन्ती त्रिपथंगमा सा
बभूव भूलोकगतापि कुल्या ॥ ७ ॥

— कुल्यायां तत्र तत्र शिलाभेदनम् —

॥ युग्मम् ॥

मनश्शिलागन्धककाष्ठरूपक्षारार्ककाष्ठेङ्गलमिश्रितेन ।
चूर्णेन दीर्घं घुटिकीकृतेन रन्ध्रे शिलाया विनिवेशितेन ॥ ८ ॥

वर्तीमुखेनाग्निविदीपितेन भिन्दन्त्यनायासमिहाश्मभूमिम् ।
सङ्घाश्शिलानां दिवि तूड्डयन्ते तालद्वयोर्ध्वं वयसां यथालिः ॥ ९ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— भूविवरगमनाय महान् कूपः —

पञ्चाशदुत्तरवितस्तिशतेन निम्नः
व्यामत्रयेण परितो विमितस्त्विहैकः ।
कूपश्चकास्ति चतुरश्रतरो विमुञ्चन्
आमूलमम्बु परितो भयमादधानः ॥ १० ॥

यत्तीरमाप्य तलमस्य दिदृक्षमाणाः
नम्रं शिरो दधति ये मनुजाः कथञ्चित् ।
ऊर्ध्वं प्रयान्ति हृदयादसवोऽनु तेषां
शून्यीभवन्ति करणानि यतश्च सद्यः ॥ ११ ॥

— कूपावतरणसाधनक्रमः —

(विशेषकम्)

तस्योपरि भ्रमति चक्रयुगं यथार्हं
तालप्रमाणचतुरङ्गिकमञ्चपृष्ठे ।
स्यूता च तत्र पृथुलायसतन्त्रिकाभिः
रज्जुः कृता प्रहिविलम्बिनिजाग्रयुग्मा ॥ १२ ॥

रज्ज्वग्रयोर्दृढनिबद्धविलम्बिनीभ्यां
कूपस्य वक्रतलयोर्युगपत्स्थिताभ्याम् ।
यन्त्रभ्रमद्रथपदानुगुणावरोहा-
रोहायसाभ्रचरमण्डपदोलिकाभ्याम् ॥ १३ ॥

आयान्ति यान्ति बहिरन्तरपीह कूपे
भृत्या नयन्ति बहुसाधनजातमाभ्याम् ।
खातं शिलाशकलमृत्प्रभृतीह तूर्णं
प्रत्याहरन्ति सकलानि च साधनानि ॥ १४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

— इदंप्रथमतया कूपेऽवतरतः स्थितिः —

यथा यथा दोलिकयाऽवरोहेत्
तथा तथा स्वस्थमनस्कता च ।
शैत्यं तमः कौतुकमप्युपैति
काष्ठां परां यावदसौ तलस्था ॥ १५ ॥

— कूपतलगतस्य भूविवरप्राप्तिः —

तस्मिन्कूपतले विभाति विवरं प्राच्यां प्रतीच्यां च ये
तिर्यग्व्यामयुगेन किञ्चिदधिकेनोर्ध्वं मितैस्तैस्त्रिभिः ।
यावत्क्रोशयुगं प्रयाति सुषिरं भूम्यन्तराद्यन्ततः
कुल्या यत्र समक्षितिप्रवहणैर्वोत्तानभूमावपि ॥ १६ ॥

— भूविवरदर्शनम् —

अवतीर्य दोलिकायाः यावद्दृक्सरणि लोकिते रन्ध्रे ।
पातालं किल कीदृक्? त्विति चिन्ताऽपैति देहिनां सद्यः ॥ १७ ॥

— विवरे दीपपङ्क्तिः —

सौदामन्या पार्श्वयोर्दीपपङ्क्त्या
माणिक्यानां मालयेवोज्ज्वलानाम् ।
नागानां वान्योन्यबद्धाङ्गकानां
मूर्धन्याभिर्भाति रन्ध्रं मणीभिः ॥ १८ ॥

दिव्योऽरुणो यत्र दिवाप्यलब्ध्वा
प्रवेशमुस्रैरथ तान्प्रदातुम् ।
भौमाग्नयेऽनिच्छुरविन्धनाय
दिव्याग्नयेऽदात्किमु हृष्टचित्तः ॥ १९ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

अथवा बहुरूपमाश्रितो
दिवसेशः किल दीपिकामिषात् ।
निजकर्म करोति निर्वृतो
न हि वह्निर्दिवसे विराजते ॥ २० ॥

— विवरस्थितस्य नानाशब्दैर्बधिरता —

नभस्वदुद्बोधशिलाविभेद-
जलोद्धृतिस्थापितयन्त्रशब्दैः ।
तदन्तरस्था बधिरा वदन्ति
ह्यनेडमूका इव संज्ञयैव ॥ २१ ॥

— विवरान्तश्शकटस्यायसपट्टामार्गः —

खातस्य मृच्छिलादेः बहिरपहरणाय शकटानाम् ।
आयसपट्टारचितः पन्था यावद्बिलं भाति ॥ २२ ॥

— विवरे यन्त्रेण शिलाभेदनप्रकारः —

(युग्मम्)

नलिकायुधाकृतिमधोमुखं, मुख-
ग्रथितायसाग्रशितदीर्घनालिकम् ।
जलवातपूरितमधिष्ठितं तथा
त्रिपदीं विधाय, लघुयन्त्रकं मुहुः ॥ २३ ॥

परिवर्त्य तत्सरुममी तु पृष्ठतो
दधिमाथमत्र दृषदि क्षणार्धतः ।
परिमथ्य रन्ध्रमतिदीर्घमग्निना
दलयन्ति धातुजनितेन निश्यहो! ॥ २४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

षष्टिस्सहस्रं सगरात्मजानां
क्षितिं चखानेति तमेनमर्थम् ।
प्रमाणशून्यं कलयन्मनो नः
प्रत्यक्षतस्सत्यमिहाद्य वेत्ति ॥ २५ ॥

— विवरस्य, शाखाभूतानि द्वित्राणि बिलानि —

बिलाच्छिलामृद्धरणाय पार्श्वे
द्वित्राणि तद्वानि बिलानि भान्ति ।
तनूनि तत्र प्रवणानि, अयोऽनः
कृष्टयर्हतावद्विधसाधनानि ॥ २६ ॥

— पूर्वोक्तकूपसदृशोऽन्यः कूपः —

क्रोशान्तरप्रदेशे
कूपस्यास्यैव तुल्यरूपोऽन्यः ।
कूपोऽस्ति तयोस्तलगं
पूर्वोक्तं सुषिरमैक्यमापन्नम् ॥ २७ ॥

— कूपतीरे यन्त्रः, विवरस्थितानां जीवनवायुपूरणार्थः —

यन्त्रोऽस्ति कश्चित्प्रहि तीरभूमौ
श्रोत्राणि शब्दैर्बधिराणि कुर्वन् ।
बिलेऽनिलं पूरयितुं निवाते
जीवातवे कर्मकृतां च तत्र ॥ २८ ॥

रन्ध्रे स्थित्वा श्वसितुमपि ये नावकाशं लभन्ते
हित्वैवाशामसुषु सततं कुर्वतां कर्म सम्यक् ।
तेषां प्राणानवितुमयमेवैक ईष्टे सुयन्त्रः
सर्वैः पूर्णस्सुगुणनिवहैः कृष्णभूपो यथा नः ॥ २९ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

– तत्र तत्र जलोद्धरणयन्त्राः –

क्षोणीगर्भे विरचिततया तत्र रन्ध्रेऽतिदीर्घे
सर्वत्रापि स्रवति सततं नीरपूरे समन्तात् ।
स्रोतोभारो न हरति यथा तत्र तान्कर्मकारान्
एवं यन्त्रास्सलिलहृतये स्थापितास्तत्र तत्र ॥ ३० ॥

यन्त्रैरुद्ध्रियते न चेदिह जलं सह्योद्भवाया जलैः
कुल्यायाः किमु कार्यमस्ति सुषिरं सह्यायते यत्स्वयम् ।
उद्धारेऽपि सदा स्रवत्यनुकलं तज्जानुदघ्नं जलं
भुक्त्वा यस्सुहितो न तत्र फलमस्त्यन्नस्य दाने कृते ॥ ३१ ॥

— जलोद्धरणयन्त्रवर्णनम् —

स्वाधीनयुक्तकार्यः सज्जीवनहृत्कुंभूमिपाल इव ।
यन्त्रोऽयं भातितरां समुन्नयन्नीचगास्त्वपस्सद्यः ॥ ३२ ॥

– शिलारन्ध्रवेधनशलाकामुखरचनयन्त्रः –

मुष्टिमेयपरिवृत्तसरन्ध्र-
व्यामदैर्घ्यकठिनायसनाडीः ।
देवसूनमुखतुल्यशिताग्राः
वेधनाय दृषदां कुरुतेऽयम् ॥ ३३ ॥

– कूपे जनानवतारयन्नुत्तारयंश्च यन्त्रः –

उच्चैर्नीचैस्सपदि तनुते नीचमुच्चैश्च सोऽयं
यन्त्रः कालः कलिरिव यथा दुर्विधिर्दुष्प्रभुर्वा ।
नीचीभूतं पुनरपि तथैवोच्चमुच्चैः करोति
श्रीमानस्मत्प्रभुरिव महान्नल्वडीकृष्णभूपः ॥ ३५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

– उपसंहारः –

सकृद्दर्शनमात्रेण येऽर्था हृदयगामिनः ।
प्रायस्ते कथिताः को वा कार्त्स्न्यार्थवस्तु वदेत्सुधीः ॥ ३५ ॥

— विषय-कवि-कालाः —

महीशूरपुरेशस्य नाल्वडीकृष्णभूपतेः ।
राष्ट्रे रत्नं भुवो रन्ध्रं वर्णितं तु यथामति ॥ ३६ ॥

बालधन्विकुलोद्भूतशिङ्गरार्यतनूभुवा ।
राजास्थान्यां च विदुषा यादवाद्रिनिवासिना ॥ ३७ ॥

साङ्गत्यवेदान्तविदुषा साहितीपारदृश्वना ।
वेङ्कटार्येण रचिता श्रीकृष्णे चार्पिता मुदा ॥ ३८ ॥

प्रजोत्पत्यब्दवैशाखमास्यमाभानुवासरे ।
निशि पूर्णाकृतिस्सेयं यद्वद्रीशकृपावशात् ॥ ३९ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

॥ श्रीः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: eGangotri.

एतद्ग्रन्थकर्त्रा विरचिताः ग्रन्थाः

वाक्यार्थविचारः –

१ रसगङ्गाधरमर्मप्रकाशमर्मोद्घाटनम्

पद्यग्रन्थाः –

२ यादवगिरिमाहात्म्यसङ्ग्रहः

३ कावेरीमहिमादर्शः (कृष्णराजसागरसेतुबन्धः)

४ व्याघ्रतडाकभूविवरवर्णनम् (इरविन् केनाल्)

५ श्रीमहाभारतकृष्णमङ्गलम्

६ सुदर्शनमङ्गलम्

७ द्वादशमूर्तिस्तोत्रम्

८ पुरुषकारवैभवम् (लक्ष्मीस्तोत्रम्)

गद्यग्रन्थाः – (सूरिचरितेषु)

९ भक्ताङ्घ्रिरेणुचरितम्

१० भक्तिसारचरितम्

११ भट्टनाथचरितम्

१२ गोदाचरितम्

१३ श्रीवत्साङ्कचरितम्

प्राप्तिस्थानम् :– जग्गु-वेङ्कटाचार्यः,
साङ्ख्यवेदान्तविद्वान्, साङ्ख्यतीर्थः,
आस्थानविद्वान्
मेलुकोटे (यदुगिरि) मैसूरुदेशः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.